श्री भुवनेश्वरी कवचं (त्रैलोक्यमंगळं)

श्री भुवनेश्वरी कवचं (त्रैलोक्यमंगळं)

देव्युवाच |
देवेश भुवनेश्वर्या या या विद्याः प्रकाशिताः |
श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि सांप्रतं || 1 ||

त्रैलोक्यमंगळं नाम कवचं यत्पुरोदितं |
कथयस्व महादेव मम प्रीतिकरं परं || 2 ||

ईश्वर उवाच |
शृणु पार्वति वक्ष्यामि सावधानावधारय |
त्रैलोक्यमंगळं नाम कवचं मंत्रविग्रहं || 3 ||

सिद्धविद्यामयं देवि सर्वैश्वर्यप्रदायकं |
पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् || 4 ||

[त्रैलोक्यमंगळस्यास्य कवचस्य ऋषिश्शिवः |
छंदो विराट् जगद्धात्री देवता भुवनेश्वरी |
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ||]

ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकं |
ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनं || 1 ||

श्रीं पातु दक्षकर्णं मे त्रिवर्णाख्या महेश्वरी | [त्रिवर्णात्मा]
वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा || 2 ||

ह्रीं पातु वदनं देवि ऐं पातु रसनां मम |
वाक्पुटं च त्रिवर्णात्मा कंठं पातु परांबिका || 3 ||

श्रीं स्कंधौ पातु नियतं ह्रीं भुजौ पातु सर्वदा |
क्लीं करौ त्रिपुटा पातु त्रिपुरैश्वर्यदायिनी || 4 || [त्रिपुटेशानि]

ॐ पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु |
क्रौं पातु नाभिदेशं मे त्र्यक्षरी भुवनेश्वरी || 5 ||

सर्वबीजप्रदा पृष्ठं पातु सर्ववशंकरी |
ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिं || 6 ||

माहेश्वरी सदा पातु सक्थिनी जानुयुग्मकं |
अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयं || 7 ||

सप्तदशाक्षरी पायादन्नपूर्णात्मिका परा |
तारं माया रमाकामः षोडशार्णा ततः परं || 8 ||

शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा |
तारं दुर्गेयुगं रक्षेत् स्वाहेति च दशाक्षरी || 9 ||

जयदुर्गा घनश्यामा पातु मां सर्वतो मुदा |
मायाबीजादिका चैषा दशार्णा च परा तथा || 10 ||

उत्तप्तकांचनाभासा जयदुर्गाऽऽननेऽवतु |
तारं ह्रीं दुं च दुर्गायै नमोऽष्टार्णात्मिका परा || 11 ||

शंखचक्रधनुर्बाणधरा मां दक्षिणेऽवतु |
महिषामर्दिनी स्वाहा वसुवर्णात्मिका परा || 12 ||

नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी |
माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता || 13 ||

पद्मावती पद्मसंस्था पश्चिमे मां सदाऽवतु |
पाशांकुशपुटे माये ह्रीं परमेश्वरि स्वाहा || 14 ||

त्रयोदशार्णा ताराद्या अश्वारुढाऽनलेऽवतु |
सरस्वती पंचशरे नित्यक्लिन्ने मदद्रवे || 15 ||

स्वाहारव्यक्षरी विद्या मामुत्तरे सदाऽवतु |
तारं माया तु कवचं खे रक्षेत्सततं वधूः || 16 ||

ह्रूं क्षं ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा |
त्वरिताष्टाहिभिः पायाच्छिवकोणे सदा च मां || 17 ||

ऐं क्लीं सौः सततं बाला मूर्धदेशे ततोऽवतु |
बिंद्वंता भैरवी बाला भूमौ च मां सदाऽवतु || 18 ||

इति ते कथितं पुण्यं त्रैलोक्यमंगळं परं |
सारं सारतरं पुण्यं महाविद्यौघविग्रहं || 19 ||

अस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः |
इंद्राद्याः सकला देवाः पठनाद्धारणाद्यतः || 20 ||

सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः |
पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् || 21 ||

संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् |
प्रीतिमन्योऽन्यतः कृत्वा कमला निश्चला गृहे || 22 ||

वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः |
यो धारयति पुण्यात्मा त्रैलोक्यमंगळाभिधं || 23 ||

कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः |
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् || 24 ||

पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा |
बहुपुत्रवती भूत्वा वंध्यापि लभते सुतं || 25 ||

ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनं |
एतत्कवचमज्ञात्वा यो जपेद्भुवनेश्वरीं |
दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् || 26 ||

इति श्रीरुद्रयामले तंत्रे देवीश्वर संवादे त्रैलोक्यमंगळं नाम भुवनेश्वरीकवचं समाप्तं |